PURANETIHASA

ACHARYA 2nd YEAR
Course/Paper.9

**PART - A**

# नारद , शाण्डिल्य भक्तिसूत्रम्

***Nārada , Śāṇḍilya Bhaktisūtram***


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# नारदभक्तिसूत्रं तथा शाण्डिल्यभक्तिसूत्रम्

## स्वाध्ययनसामग्री

## नारदभक्तिसूत्रम्

ऋषिपुङ्गवःमहर्षिनारदःभक्तिसूत्रस्यरचयिताभवति।सःब्रह्मणःमानसपुत्रःमहाविष्णोःपरमभक्तश्च।महतीइतिनाम्नावीणांवादयन्सःनारायणस्यनामजपन्देशसञ्चारंकरोतिस्म।मनुष्याणांहिताकांक्षिषुनारदस्यप्रामुख्येननामआगच्छति।

अहोदेवर्षिःधन्योऽयंयत्कीर्त्तिंशार्ङ्गधन्वनः।

गायन्माद्यन्निदंतन्त्र्यारमयत्यातुरंजगत्।।

विष्णुतःप्राप्तांविद्यांसःयोग्यान्पुरुषान्बोधितवान्।नारायणनामस्मरन्त्रिषुलोकेषुअपिसंचरन्सःअसहायानांसज्जनानामुपकारंकृतवान्।महाभारतेउक्तमस्तियत्देवर्षिनारदःसमस्तवेदानांज्ञाता, देवानांपूज्यः, इतिहासपुराणविशेषज्ञः, अतीतकल्पकथानांविज्ञाता, धर्मतत्त्व-विज्ञान-शिक्षा-कल्पव्याकरणादिषुशास्त्रेषुअसाधारणःपण्डितः, संगीतविशारदः, मीमांसकः, प्रभावशालीव्याख्याता, मेधावी, स्मृतिमान्, नीतिज्ञः, कविः, ज्ञानी, वृहस्पतिइवविद्वान्पण्डितश्चासीत्।सःधर्मार्थकाममोक्षतत्त्वानांविज्ञातापरमवैष्णवःविष्णुभक्तः, भक्तिसूत्रस्यचरचयिताआसीत्।एषःदेवर्षिनारदःसर्वतत्त्वानामुपदेशंकृत्वातदनु

“अथातोभक्तिंव्याख्यास्यामः“

इतिउक्त्वाभक्तितत्त्वमुपदिष्टवान्।एतस्मात्ज्ञायतेयत्भक्तितत्त्वंसर्वश्रेष्ठतत्त्वमिति।देवर्षिनारदेनरचितेअस्मिन्भक्तिसूत्रे 84

सूत्राणिसन्ति। एषुसूत्रेषुभक्तिविषयकविचारोविहितोस्ति। अस्मिन्नारदभक्तिसूत्रेभक्तेःमहत्त्वं, लक्षणं, साधनं, भगवतःस्वरूपज्ञानं, भक्तिकृतेनियमाः, फलंविषयाश्चसविस्तरंचर्चिताःसन्ति ।प्रस्तुतपाठ्यक्रमे एतादृशस्यनारदभक्तिसूत्रस्यभक्तिविषयकतत्त्वानि साररूपेण संगृह्य चतुर्षु अध्यायेषु आलोचिताःसन्ति। तदनु पुनरपि एकाध्यायेषु शाण्डिल्यभक्तिसूत्राणां सारांशोत्र विहितोस्ति ।अतःपरीक्षार्थिनांसौविध्यार्थं संकल्य पञ्चाध्यायेषुअत्र सर्वेपि भक्तिविषयाः सम्यक् आलोचिताः सन्ति ।

## प्रथमोंशः

**प्रस्थावना—**

देवर्षिनारदःसर्वतत्त्वानामुपदेशंकृत्वातदनु "अथातोभक्तिंव्याख्यास्यामः "इतिउक्त्वाभक्तितत्त्वमुपदिष्टवान्। एतस्मात्ज्ञायतेयत्भक्तितत्त्वंसर्वश्रेष्ठतत्त्वमिति। देवर्षिनारदेनरचितेअस्मिन्भक्तिसूत्रे 84 सूत्राणिसन्ति ।एषुसूत्रेषुभक्तिविषयकविचारोविहितोस्ति। अस्मिन्नारदभक्तिसूत्रेभक्तेःमहत्त्वं, लक्षणं, साधनं, भगवतःस्वरूपज्ञानं, भक्तिकृतेनियमाः, फलंविषयाश्चसविस्तरंचर्चिताःसन्ति ।प्रस्तुतपाठ्यक्रमे एतादृशस्य नारदभक्तिसूत्रस्यप्रथमांशेमुख्यतया महर्षिनारदस्य परिचयः,भक्तेः स्वरूपं,लक्षणम् उदाहरणञ्च यथाग्रन्थं सविस्तरमालोचितमस्ति ।

**उद्देश्यम् --**

प्रियपाठकाःनारदभक्तिसूत्रस्यप्रस्तुतपाठेवयंनिम्नलिखितान्विन्दून्आलोचयिष्यामः।

1. महर्षिनारदस्य परिचयः

2. भक्तेः स्वरूपम्

3. भक्तेः लक्षणम्

4. भक्तिलक्षणगतानि उदाहरणानि

## महर्षिनारदस्य परिचयः

वेदेषुउपनिषत्सु पुराणेषुच बहुत्र नारदस्य प्रस्तावना दृश्यते।भगवतःपरमभक्तः देवर्षिनारदः ब्रह्मदेवस्य मानसपुत्रः।महतीइतिनाम्नावीणांवादयन्सःनारायणस्यनामजपन्देशसञ्चारंकरोतिस्म ।मनुष्याणांहितकांक्षिषुनारदस्यप्रामुख्येननामआगच्छति ।

अहोदेवर्षिःधन्योऽयंयत्कीर्त्तिंशार्ङ्गधन्वनः।

गायन्माद्यन्निदंतन्त्र्यारमयत्यातुरंजगत्।।

विष्णुतःप्राप्तांविद्यांसःयोग्यान्पुरुषान्बोधितवान्।नारायणनामस्मरन्त्रिषुलोकेषुअपिसंचरन्सःअसहायानांसज्जनानामुपकारंकृतवान्।महाभारतेउक्तमस्तियत्देवर्षिनारदःसमस्तवेदानांज्ञाता, देवानांपूज्यः, इतिहासपुराणविशेषज्ञः, अतीतकल्पकथानांविज्ञाता, धर्मतत्त्व-विज्ञान-शिक्षा-कल्पव्याकरणादिषुशास्त्रेषुअसाधारणःपण्डितः, संगीतविशारदः, मीमांसकः, प्रभावशालीव्याख्याता, मेधावी, स्मृतिमान्, नीतिज्ञः, कविः, ज्ञानी, वृहस्पतिइवविद्वान्पण्डितश्चासीत्।सःधर्मार्थकाममोक्षतत्त्वानांविज्ञातापरमवैष्णवःविष्णुभक्तः, भक्तिसूत्रस्यचरचयिताआसीत्।एषःदेवर्षिनारदःसर्वतत्त्वानामुपदेशंकृत्वातदनु “अथातोभक्तिंव्याख्यास्यामः“ इतिउक्त्वाभक्तितत्त्वमुपदिष्टवान्। तेन प्रोक्तान्येव नारदभक्तिसूत्राणि। नारदस्य नाम्ना विद्यमानाः प्रसिद्धग्रन्थाः यथा–नारदभक्तिसूत्रम्,नारदस्मृतिः, नारदीयशिक्षा, नारदोपनिषद्नारदपुराणम्,नारदपाञ्चरात्रमिति ज्ञायन्ते । नारदभक्तिसूत्रं भवति महर्षिनारदविरचितंसूत्ररूपेण रचितंभगवत्भक्तिप्रतिपादकमेकं ग्रन्थविशेषम् ।चतुरशीतिसूत्राणि ग्रन्थेस्मिन् सन्ति । ग्रन्थस्यास्य कर्तुः कालविषयेकिमपिस्पष्टता नास्ति। नारदकृतोविभिन्नाचार्याणां मतानि ग्रन्थातरेभ्यः उपदेशाश्चसंगृह्यरचितोयं ग्रन्थः इति प्रसिद्धिः ।शाण्डिल्यभक्तिसूत्रमपेक्षया अत्र उपयुक्ता भाषा सरला सुलभाचेति ज्ञायते ।

**बोधप्रश्नः –**

1. **ब्रह्मणःमानसपुत्रःकः।**

2. **नारदस्य वीणायाः नाम किम्।**

**भक्तेः स्वरूपम्**

प्रसंगवशात् एतादृश्याः भक्तेः किं तावत् स्वरूपमिति तदवलम्ब्य किञ्चिदालोच्यते। "भज्" सेवायामिति धातोः भक्तिशब्दस्य निष्पन्नत्वात् भगवत्सेवैव भक्तिरिति ज्ञायते । यथोक्तं नारदपञ्चरात्रे-

**सर्वोपाधि विनिर्मुक्तं तत्परत्वेन निर्मलम् ।**
**हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ।।**

भक्तिरसामृतसिन्धौ रूपगोस्वामी भक्तेः लक्षणं निरूपयन् कथयति यत्-

**अन्याऽभिलाषिता शून्यं ज्ञानकर्माद्यनावृतम् ।**
**आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ।।** इति ।

अत्र अनुकूलतया भगवत्सेवनादिकं उत्तमा भक्तिरिति निगद्यते । किन्तु प्रातिकूल्येनापि भगवच्चिन्तनादिकं भक्तिः भवति, किन्तु नोत्तमा । यतिवर्यः श्रीमधुसूदनसरस्वतीपादः स्वभक्तिरसायने प्रतिपादयति यत्- भगवद्भावेन द्रवीभूतस्य चित्तस्य भगवदाकारता एव भक्तिरिति निगद्यते । तथा हि भक्ति-रसायने-द्रवीभावपूर्विका मनसो भगवदाकाररूपा सविकल्पा वृत्तिर्भक्तिः । श्रीमद्भागवते च तृतीयस्कन्धे भगवान् कपिलः स्वमातरं देवभूतिं प्रति भक्तिलक्षणविषये कथयति यत्- भगवद्गुणगानश्रवणमात्रेण भगवदभिमुखी मनोगतिरेव भक्तिरिति निगद्यते । यथा गंगाजलस्य समुद्रं प्रति धारारूपेण अविच्छिन्ना गतिः वर्तते, तथा भगवन्तं प्रति मनसः अविच्छिन्ना गतिरेव भक्तिरिति कथ्यते । तद्यथा-

**मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।**
**मनोगतिरविच्छिन्ना यथा गंगाम्भसोऽम्बुधौ ।।**

**लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतः ।**

**अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।।** इति ।

सूत्रग्रन्थेष्वपि भक्तेः लक्षणं सूत्रकारैर्निर्देशितं वर्तते । देवर्षिः नारदः स्वकीये नारदभक्तिसूत्रे कथयति "सा त्वस्मिन् परमप्रेमरूपा" । भगवति परमप्रेम एव भक्तिरिति नारदस्य मतम् । महर्षिः शाण्डिल्य स्वशाण्डिल्यभक्तिसूत्रे ईश्वरे परमानुरागः एव भक्तिरिति कथयति । तद्यथा "सा परानुरक्तिरीश्वरे" इति । अस्मिन् सूत्रे शाण्डिल्यः कथयति यत्- प्रथमतो भगवतः स्वरूपज्ञानं स्यात् ततश्च भगवति यः परमरागः आसक्तिश्च जायते, स एव रागः भक्तिरिति प्रोच्यते । भगवति यः रागः स एव संसारनिवर्तकः न तु प्रवर्तकः । यतो हि भगवत्युनुरागः संसारं निरश्य भगवन्तं प्रापयति । अयमनुरागः अथवा भगवत्प्रीतिः तथा गाढत्वं गच्छेत्, यथा अस्माकं सांसारिणां संसारविषयेषु प्रीतिः प्रगाढा वर्तते । अतो हि विष्णुपुराणे प्रह्लादेन नृसिंहाय इयं प्रीतिरेव प्रार्थिता । तद्यथा-

**या प्रीतिरविवेकानां विषयेष्वनुपायिनी ।**

**त्वामनुस्मरतः सा मे हृदयात् माऽपसर्पतु ।।** इति ।

अंगिरसमुनेः मते सा भक्तिः ईश्वरानुरागरूपा भवति । इयं भक्तिः द्वेषप्रतिकूला रागानुकूला च अलौकिकी वृत्तिः । भगवान् श्रीशंकराचार्यः स्वकीये विवेकचूडामणिग्रन्थे आत्मस्वरूपानुसन्धानमेव भक्तिरिति कथयति । अत्र आत्मनः स्वरूपं भगवतः उपसाकरूपेण अनुसन्धेयम् । नोचेत् भक्तिशब्दस्य सेवारूपार्थः न भवेत् । अनेन प्रकारेण बहुभिराचार्यैः भक्तेः यानि लक्षणानि कृतानि तेभ्यः अयमेव सारः स्वीक्रियते यत् परमात्मनि भगवति अनन्यसाधारणप्रेमैव भक्तिरित्युच्यते।

**बोधप्रश्नः –**

1. भक्तिरसामृतसिन्धुग्रन्थस्य रचयिता कः।

2. कपिलमुनेः मातुः नाम किम्।

## भक्तेः लक्षणम्

भक्तिविषयेविभिन्नप्रकाराणिमतानिसन्ति। परन्तुनारदमहर्षिणाप्रतिपादितभक्ति: प्रेमस्वरूपाभवति। नारदस्यभक्तिसूत्रेभक्त्या: लक्षणंसम्यक्तया वर्णितमस्ति। विभिन्नाचार्याणांमतेनभक्तेःस्वरूपंभिन्नंभिन्नमस्ति।

**पूजादिष्वनुरागइति पाराशर्यः ।**

पराशरात्मजस्यश्रीव्यासदेवस्यमतानुसारंभगवत्पूजादिषुअनुरागएवभक्तिः। स्वतनुमनोधनादिकंभगवतःपूजासामग्रीरूपेणचिन्तयित्वाभगवतःविश्वरूपंपूजयेत्। ततःफलस्वरूपेणसंसारस्यबन्धनात्विषयाच्चमनः स्वत: बहिर्भवति । भगवत: पूजयाभगवत्परमपदप्राप्तिर्भवति ।

**श्रीविष्णोः पूजनं येतुप्रकुर्वन्तिनराभूवि ।**

**तेयान्तिशाश्वतंविष्णोरानन्दंपरमंपदम् ।।**

**कथादिष्वितिगर्ग:-**

गर्गाचार्यस्यमतानुसारंभगवतःकथादिषुअनुराग एवभक्तिरितिज्ञायते । भगवतःदिव्यलीलायाः, महिमायास्तथातस्यगुणनामादीनां श्रवणं, कीर्तनं,-मननादिकञ्चएवभक्तेःप्रधानलक्षणमिति प्रोक्तमस्ति ।

**आत्मरत्याविरोधेनेतिशाण्डिल्यः**

शाण्डिल्यमतेनआत्मरत्याअविरोधिविषयेअनुरागएवभक्तिः। अविच्छिन्नरूपेणशुद्धात्मस्वरूपेणरतिर्भवतिआत्मरतिः ।

**शङ्कराचार्यस्य मतानुसारम् -**

**मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी ।**

**स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते। ।**

आत्मरूपेणभगवान्प्रत्येकप्राणिमध्येविराजमानोस्ति। अतःतंसर्वात्मरूपंभगवन्तंये भक्तिंकुर्वन्तितेमुक्तिंप्राप्नुवन्तिइति नास्तिसन्देहस्यलेशोपि अवकाशः ।

**नारदस्तुतदार्पिताखिलाचारितातद्विस्मरणेपरमव्याकुलतेति।**

परन्तुनारदस्यमतानुसारंस्वसर्वकर्मभगवत्कृतेसमर्प्यनिमिषमात्रमपिभगवत्विस्मरणात्परमव्याकुलतायाः अनुभवएवभक्तिरिति प्रोक्तमस्ति ।नारदमहर्षिः,व्यास-गर्ग-शाण्डिल्यकथितभक्तिलक्षणस्यकिमपिविरोधंनकृतवान्। परन्तुएतस्याःभक्तेःअत्यधिकपुष्टिकरणनिमितंनारदःअन्यमेकं सर्वाङ्गपरिपूर्णं भक्तिलक्षणंसमुपस्थापितवान्। स्वसमस्तवैदिकम्एवंलौकिकंकर्मभगवतिसमर्प्यप्रियतमस्यभगवतःअखण्डस्मरणम्एवंनिमिषमात्रमपिविस्मरणेनपरमव्याकुलतायाः अनुभवः एवसर्वलक्षणसंपन्नाप्रेमभक्तिरिति नारदस्याभिमतम्।

भक्तिलक्षणादिविषये पुनरपि प्रोक्तमस्ति यत्-

**अन्याभिलाषिताशून्यंज्ञानकर्माद्यनावृतम् ।**

**आनुकूल्येनकृष्णानुशीलनंभक्तिरुत्तमा ॥**

अत्रअनुकूलतयाभगवत्सेवनादिकमुत्तमाभक्तिरितिनिगद्यते। प्रातिकूल्येनापिभगवच्चिन्तनादिकंभक्तिर्भव ति, किन्तुतन्नउत्तमा । यथागङ्गाजलस्यसमुद्रंप्रतिधारारूपेणअविच्छिन्नागतिर्वर्तते, तथैवभगवन्तंप्रतिमनस: अविच्छिन्नागतिरेव भक्तिरितिकथ्यते ।

**लक्षणंभक्तियोगस्यनिर्गुणस्यह्युदाहृतम् ।**

**अहैतुक्यव्यवहितायाभक्तिःपुरुषोत्तमे ॥**

एवम्प्रकारेणभक्तिलक्षणंनारदभक्तिसूत्रेसविशदं वर्णितमस्ति ।

**बोधप्रश्नः –**

1. भक्तिरसामृतसिन्धुग्रन्थस्य रचयिता कः।
2. कपिलमुनेः मातुः नाम किम्।

## भक्तिलक्षणगतानि उदाहरणानि

भगवान्श्रीकृष्णःश्रीमद्भगवद्गीतायामुक्तवान्यत् :-

**तपस्विभ्योऽधिकोयोगीज्ञानिभ्योऽपिमतोऽधिकः।**

**कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन।।**

**योगिनामपिसर्वेषांमद्गतेनान्तरात्मना।**

**श्रद्धावान्भजतेयोमांस मेयुक्ततमोमतः॥**

अर्थात् तपस्यिभ्यः, ज्ञानिभ्यस्तथा कर्मिभ्यश्चापियोगीश्रेष्ठोस्ति ।

योगिनांमध्येपिश्रद्धावतःभक्तस्यश्रेष्ठतावरीवर्तते।कर्मफलस्यक्षयिष्णुत्वात्,ज्ञानयोगयोःदुष्करत्वात् अनिश्चितफलवत्त्वाच्चतेकर्मज्ञानयोगा: जीवमुक्तौसफलोपाया: भवितुंनार्हन्ति।

**तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यच।**

**मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्।।**

लाभ- हानि, जय- पराजय, सुखदुखञ्च नचिन्तयित्वातैलधारावत्केवलंभगवतःनाम-रूप-गुण-प्रभावादीनांचिन्तनमेवभक्तिगतंपरमलक्षणमिति विचार्यते ।

पूर्णसमर्पितभक्तःराज्यसुखभोगसमयेपिप्रियतमस्यभगवतःस्मरणंन त्यजति।

**"नतथामेप्रियतमआत्मयोनिर्नशङ्करः।**

**नचसङ्कर्षणोनश्रीर्नैवात्माचयथाभवान्।।"**

**यथाब्रजगोपिकानाम् ।**

ब्रजगोपिकानांभक्तिःसर्वोत्तमा भवति । गोपिकानांधन-जीवन-यौवन-लोक-परलोक-सर्वमपिभगवतः श्रीकृष्णस्यसमीपेअर्पितमासीत् । ताः गोपिकाः अहोरात्रंश्रीकृष्णचिन्तनपराःगद्गद्वाण्यानिरन्तरंश्रीकृष्णस्येवगुणगानंकृत्वा सर्वत्रसर्वदाश्रीकृष्णमेव पश्यन्ति स्म ।यत्-

**नपारयेऽहंनिरवद्यसंयुजां**

**स्वसाधुकृत्यंविबुधायुषापिवः।**

**यामाभजन्दुर्जरगेहश्रृङ्खला:**

**संवृश्च्यतद्वःप्रतियातुसाधुना ।।**

**तत्रापिनमाहात्म्यज्ञानविस्मृत्यपवादः।**

गोपिकाःभगवतःश्रीकृष्णस्य माहात्म्यंप्रभावञ्चसम्यक्जानन्ति स्म ।भक्त्यवस्तायांमाहात्म्यज्ञानविस्मृतिःकिमपिअपवादोनास्ति । गोपिकाःश्रीकृष्णं साक्षात् भगवत्स्वरूपंपुरुषोत्तममितिजानन्ति स्म ।

**नखलुगोपिकानन्दनोभवान्**

**अखिलदेहिनामन्तरात्मदृक् ।**

**विखनसार्थितोविश्वगुप्तये**

**सखउदेयिवान्सात्त्वतांकुले ॥**

**तद्विहीनंजाराणामिव**

माहात्म्यज्ञानंविनागोपिकानां श्रीकृष्णेप्रेमजाराणमिव स्यात् ।महात्माशुकदेवःमृत्युनिमित्तंजाग्रतराजानंपरिक्षितमपिभगवत्प्रेमलीलांश्रावितवान् ।अतएवएतत्प्रेमभगवत्माहात्म्यज्ञानयुक्तंपरमभक्तियुतमासीत् ।

**नास्त्येवतस्मिंस्तत्सुखसुखित्वम्-**

अभिचारीमनुष्यःकामवशगोभूत्वास्वसुखनिमित्तंइन्द्रियतृप्तिनिमित्तञ्चप्रीतिंकरोति । सःस्वप्रेमास्पदसुखेनसुखीनभवति। परन्तु गोपिनांप्रेमएतादृशं नासीत् ।गोपिकाःस्वसर्वस्वदानेनश्रीकृष्णस्यसुखमिच्छन्ति स्म ।सर्वाःअपि गोपिकाःस्वतनुमनोबुद्धिरुपयौवनधनप्राणादिकं सर्वमपिवस्तुप्रियतमश्रीकृष्णस्यपूजासामग्रीरूपेणचिन्तयतिस्म ।

भक्तौ सर्वे अधिकारिण: भवन्ति । भक्तिविषये उच्चवंशे जन्मादीनां प्राधान्यं नास्ति । जीवमात्रस्य अधिकार: भक्तौ वर्तते । भगवान् केवलया भक्त्या परितुष्यते न तु विद्याधनादिभि: । अतो वास्तवत: हरिभक्तिरसामृतसिन्धौ कथितं यत्-

**व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का**

**का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम्**

**कुब्जाया: किमु नाम रूपमधिकं किं तत् सुदाम्नो धनम्**

**भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधव:।।** इति ।

प्रगाढ्या भक्त्या प्रसन्नो भगवान् आत्मन: सर्वं कार्यं परित्यज्य भक्तस्य कृते सर्वं कर्तुं सज्जी भवति । पाण्डवानां भक्त्या सन्तुष्टो भगवान् श्रीकृष्ण: उत्कृष्टं कौरवकुलं दूरे परित्यज्य पाण्डवानां मंगलचिन्तां कुर्वन् अर्जुनस्य रथे सारथ्यमपि चकार । प्रह्लादस्य भक्त्याऽऽकृष्ट: भगवान् सर्वासु विपत्सु भक्तं सुरक्षितवान् । ध्रुवस्य भक्त्या वशीभूत: भगवान् अरण्येऽपि तद्रक्षां कृत्वा, अन्ते तस्मै परमलोकं दत्तवान् । कौरवसमामध्ये विवस्त्रायै द्रौपद्यै अक्षयं वस्त्रं दत्वा तल्लजां निवारितवान्। अनेन प्रकारेण स्वभक्तानामुद्धारं भगवान् युगे युगे कुर्वन् वर्तते ।एवम्प्रकारेण अत्र भक्तिविषयकानि कतिपयोदाहरणानि उपन्यस्तानि सन्ति ।भगवान् भक्त्या बद्ध: सन् भक्तानां हृदि स्थित्वा तेषाममंगलं नाशयति, मंगलञ्च वर्धयति ।अतो भक्तिरेव सर्वै काम्या, करणीया च वर्तते ।

**बोधप्रश्नः –**

1. **गोपिकानांधन-जीवन-यौवन-लोक-परलोक-सर्वमपिकस्य कृतेअर्पितमासीत्।**

2. माधवः किं प्रियः भवति ।

## सारांशः

देवर्षिनारदःसमस्तवेदानांज्ञाता, देवानांपूज्यः, इतिहासपुराणविशेषज्ञः, अतीतकल्पकथानांविज्ञाता, धर्मतत्त्व-विज्ञान-शिक्षा-कल्पव्याकरणादिषुशास्त्रेषुअसाधारणःपण्डितः, संगीतविशारदः, मीमांसकः, प्रभावशालीव्याख्याता, मेधावी, स्मृतिमान्, नीतिज्ञः, कविः, ज्ञानी, वृहस्पतिइवविद्वान्पण्डितश्चासीत्। सःधर्मार्थकाममोक्षतत्त्वानांविज्ञातापरमवैष्णवःविष्णुभक्तः, भक्तिसूत्रस्यचरचयिताआसीत्। एषःदेवर्षिनारदःसर्वतत्त्वानामुपदेशंकृत्वातदनु

"अथातोभक्तिंव्याख्यास्यामः"

इतिउक्त्वाभक्तितत्त्वमुपदिष्टवान्। एतस्माज्ज्ञायतेयत्भक्तितत्त्वंसर्वश्रेष्ठतत्त्वमिति। देवर्षिनारदेनरचितेअस्मिन्भक्तिसूत्रे 84 सूत्राणिसन्ति। एषुसूत्रेषुभक्तिविषयकविचारोविहितोऽस्ति। अस्मिन्नारदभक्तिसूत्रेभक्तेःमहत्त्वं, लक्षणं, साधनं, भगवतःस्वरूपज्ञानं, भक्तिकृतेनियमाः, फलंविषयाश्चसविस्तरंचर्चिताःसन्ति । प्रस्तुतपाठ्यक्रमे एतादृशस्य नारदभक्तिसूत्रस्यप्रथमांशोमुख्यतया महर्षिनारदस्य परिचयः,भक्तेः स्वरूपं,लक्षणम् उदाहरणञ्च यथाग्रन्थं सविस्तरमालोचितमस्ति ।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः—**

1. सा त्वस्मिन् परमप्रेमरूपा इति सूत्रं व्याख्यात।

2. नारदस्य संक्षिप्तपरिचयं प्रदत्त।

3. यथा व्रजगोपिकानामिति सूत्रं स्पष्टयत।

**विश्लेषणात्मकप्रश्नाः—**

1. भक्तेः लक्षणं स्पष्टयत।

2. भक्तिविषयकानि उदाहरणानि आलोचयत।

**निबन्धात्मकप्रश्नाः—**

1. भक्तिप्रियो माधवः इति प्रपञ्चयत।

2. भक्तेः स्वरूपं प्रतिपादयत।

**एकाङ्कप्रश्नाः—**

1. ब्रह्मणः मानसपुत्रः कः।

2. भज् धातुः कस्मिन् अर्थे भवति।

3. भक्तिप्रियः कः।

4. पाराशर्यः कः।

5. कथादिष्विति कस्याभिमतम्।

6. नारदभक्तिसूत्रे संकल्य कति सूत्राणि सन्ति।

7. नारदमहर्षेः वीणायाः नाम किम्।

8. तपस्विभ्योधिकः कः।

9. ज्ञानिभ्योपि मतोधिकः कः।

10. श्रीकृष्णः अर्जुनं किं भव इति उपदिशति।

**उत्तराणि —**

1. महर्षिनारदः 2. सेवायाम् 3.माधवः 4. व्यासदेवः 5. गर्गाचार्यस्याभिमतम् 6. चतुरशीति सूत्राणि 84

7. महती 8. योगी 9. योगी 10. योगी भव इति उपदिशति।

## द्वितीयांशः

**प्रस्थावना-**

अस्मिन्नारदभक्तिसूत्रेभक्तेःमहत्त्वं, लक्षणं, साधनं, भगवतःस्वरूपज्ञानं, भक्तिकृतेनियमाः, फलंविषयाश्चसविस्तरंचर्चिताःसन्ति ।प्रस्तुतपाठ्यक्रमे एतादृशस्य

नारदभक्तिसूत्रस्यद्वितीयांशेमुख्यतया जीवधर्मत्वेन भगवद्भक्तिः,जीवस्य संसारगतिः भक्तिश्च,विषयासक्तिः भक्तिश्च इति विषयाः अत्र सम्यक् आलोचिताः सन्ति।

**उद्देश्यम् --**

प्रियपाठकाःनारदभक्तिसूत्रस्यप्रस्तुतपाठेवयंनिम्नलिखितान्विन्दून्आलोचयिष्यामः।

1. **जीवधर्मत्वेन भगवद्भक्तिः**

1. **जीवस्य संसारगतिः भक्तिश्च**

2. **विषयासक्तिः भक्तिश्च**

**जीवधर्मत्वेन भगवद्भक्तिः**

**धारणात् धर्ममित्याहु ! धर्मो धारयते प्रजा ।**
**यत् स्याद् धारणसंयुक्तं स धर्म इति निश्चयः ।।**

इति महाभारतीयवचनानुसारं धर्म एव जगद्धारकः लोकधार्यश्च भवतीति निश्चयः । इमां परिभाषां स्वीकृत्य भारतीयशास्त्रेषु धर्मः बहुधा कल्पितः । अहिंसादिसाधारणमानवीयगुणा अपि धर्मकोटौ स्वीकृता अभवन् । अपि च तत्तद्वर्णेषु आश्रमेषु च स्थितानां जनानां कर्तव्यानि कर्माण्यपि धर्मरूपेण प्रतिपादितानि । किन्तु वास्तवतो यत्तत्वं जीवं स्वाभाविकतया धृत्वा स्ववास्तवस्वरूपमर्थात् भगवत्स्वरूपं प्रापयति, स एव धर्म पदवाच्यो भवितुमर्हति । एतदृष्ट्या भक्तिरेव स्वाभाविकतया जीवं धारयति, जीवेन ध्रियते च, इति हेतोः सैव जीवधर्मत्वेन स्वीक्रियते।

**बोधप्रश्नः**

धर्मः किं धारयते ।

**जीवस्य संसारगतिः भक्तिश्च**

भगवद्दासः तदभिन्नो वा जीवः स्वस्वरूपं विस्मृत्य जीवत्वं प्राप्नोतीति सिद्धान्तः । तत्र मायायाः आवरणशक्त्या स्वरूपविस्मृतिः विक्षेपशक्त्या च अन्यथा ज्ञानं जायते । अन्यथाज्ञानद्वारा सांसारिकवस्तुषु आत्मबुद्धिरागच्छति । तानि च सांसारिकवस्तूनि विषया इति कथ्यन्ते । तेषु विषयेष्वासक्तिरेव संसारगतेः स्वरूपंभवति ।गर्भस्थजीवः दिव्यज्ञानं प्राप्य इत्थं चिन्तयति- मया पूर्वजन्मसु कीदृशानि पापानि कृतानि यत् जन्मन्यस्मिनहम् अस्मिन् गर्भे वसामि । अस्मात् अधिकदुःखतरं किमस्ति ? यद्यहं गर्भतो निर्गमिष्यमि तर्हि प्रभुं हरिं नूनं भजिष्यामि, येन गर्भवासदुःखं पुनः कदापि न प्राप्स्यामीति । अनन्तरं जीवो दशममासेऽतिकष्टेन गर्भात् निर्गच्छति । किन्तु गर्भाद् बहिरागत्य जीवः पुनः मायया श्लिष्यते ।मायया अज्ञानग्रस्तः भगवच्चेतनातः विच्छिन्नः जीवः संसारबन्धनात् मुक्त्यर्थं पुनरपि तदेव भगवद्पदं परमानन्दञ्च प्राप्तुं भगवद्भक्तिमार्गमेव अनुसृत्य चलति।

> बोध प्रश्नः
>
> मायायाः आवरणशक्तितः किं भवति ।

**विषयासक्तिः -**

एषः कोऽस्त्यस्मिन् संसारे यः स्त्रीणांमोहनशक्त्या मोहितो भूत्वा विनाशं न प्राप्नोति ? पतंगो यथा ज्वलद्वह्निं दृष्ट्वा उल्लसितो भवति, परन्तु तदवसरेऽग्निसम्पर्कजं दाहदुःखं नैव चिन्तयति, तथैव स्त्रीणां दर्शनेन मनुष्यो घोरसंसारदुःखं नैव विचारयति । स मलमूत्रविष्ठादिभिः पूरितं देहं वरं मन्यते । एवं मोहितः सन् तत्रैव रमते । यथा विष्ठासमुद्भुतः कीटः तत्रैव मोदते, तथैवाऽपवित्रस्त्रीदेहतो जन्म प्राप्य पुरुषस्तस्मिन्नेव स्त्रीदेहे रमते । अस्माद्धैतोर्मनुष्यो दुःखं प्राप्नोति । परन्तु स गृहे स्थित्वा स्वयं सुखवान् इति मन्यते। स धनार्जनाय यत्नं कृत्वाऽशुभकर्माण्यपि करोति। धनाकांक्षया स इतस्ततो भ्रमति । मूढधीः पुरुषः स्वकीयान् प्रियान् प्राणान् अनादृत्य धनाकांक्षया ह्यनिशं प्रधावति । स तृष्णानीहारनष्टाक्षो नैहिकं पारलौकिकं वा हिताहितं जानाति । सुखलालसारुपिकूपे पतन् तस्य वयः क्रमशः क्षीणतां याति । परन्तु सोऽचेतन इवाऽऽचरति । तस्य कृते धनमेव सर्वस्वं, परं न स्त्री, सहोदरः, बन्धुः, पिता माता वा । धनार्थं स मूढधीः पुरुषः प्राणान् पितृमातृसहोदरान्, सत्यं, धर्मं, दयां, मैत्रीञ्च त्यजति, परन्तु धनाशां कथञ्चन न मुञ्चति । स मानापमानं तथा शुभाशुभं न गणयन्, पुनश्चाऽधर्मसेवनमपि कृत्वा केवलं धनमेवेच्छति । स्त्रीपुत्रादीनां सुखार्थे स धनस्य व्ययं करोति,

परन्तु सदर्थे कदापि स्ववित्तस्योपयोगं न करोति । अबुधः पुरुषः साधुभ्यः अथवा देवेभ्यः किञ्चिदपि दातुं नोत्सहते । किन्तु यदि गेहे धनं नास्ति तर्हि विवाहाद्यर्थसिद्धये ऋणेनाऽपि धनमानयति, केवलं प्रतिष्ठार्थमेव । अतो बन्धुष्वासक्तचित्तस्याऽहर्निशं क्लेशवतस्तेषां पोषणपरस्य च कुतो ज्ञानं कुतो वा सुखं स्यात् ? तस्य धनसञ्चये जातेऽपि न ददाति, न भुंक्तेः, न हरिभाक्तिं करोति, न दानं साधुसंगमञ्च साधयति । स हरिभक्तान् एवं निन्दति यथा-

एते कुटुम्बपालने अक्षमाः स्नेहहीनाः असमर्थाश्चेति । कुटुम्बयुक्तः सः मूढः पुरुषः एवं कथयति यत्- "परलोकः केन दृष्टः, मुक्त्यादिकथाः सर्वाः मिथ्या एव। अतस्तदर्थं क्रियाकलापकरणं निरर्थकमेवति । एवं प्रकारेण कुटुम्बादिष्वासक्तो महामोहवशंगतः पुरुषः आत्मनैवाऽऽत्मानं नाशयति । एवं संसारे तस्योद्धारो न सम्भवति । स्वदेहेऽत्यभिमानिनः कामासक्तस्य मूढस्य "अहं" "ममेति" विचारेणकालः गच्छति, तस्यैहिकं पारलौकिकञ्चसर्वं नश्यति । अतः विषयासक्तस्य मनुष्यस्य उद्धरणार्थं भगवद्भक्तिरेव परमगतिर्भवति ।

**बोध प्रश्नः**

**स्त्रीणां मोहनशक्त्या कः वशीभूतो भवति ।**

## सारांशः

अहिंसादिसाधारणमानवीयगुणा अपि धर्मकोटौ स्वीकृता अभवन् । अपि च तत्तद्वर्णेषु आश्रमेषु च स्थितानां जनानां कर्तव्यानि कर्माण्यपि धर्मरूपेण प्रतिपादितानि । किन्तु वास्तवतो यत्तत्वं जीवं स्वाभाविकतया धृत्वा स्ववास्तवस्वरूपमर्थात् भगवत्स्वरूपं प्रापयति, स एव धर्म पदवाच्यो भवितुमर्हति । एतदृष्ट्या भक्तिरेव स्वाभाविकतया जीवं धारयति, जीवेन ध्रियते च, इति हेतोः सैव

जीवधर्मत्वेन स्वीक्रियते। सांसारिकवस्तूनि विषया इति कथ्यन्ते । तेषु विषयेष्वासक्तिरेव संसारगतेः स्वरूपंभवति ।मायया अज्ञानग्रस्तः भगवच्चेतनातः विच्छिन्नः जीवः संसारबन्धनात् मुक्त्यर्थं पुनरपि तदेव भगवद्पदं परमानन्दञ्च प्राप्तुं भगवद्भक्तिमार्गमेव अनुसृत्य चलति।एषः कोऽस्त्यस्मिन् संसारे यः स्त्रीणांमोहनशक्त्या मोहितो भूत्वा विनाशं न प्राप्नोति ? पतंगो यथा ज्वलद्वह्निं दृष्ट्वा उल्लसितो भवति, परन्तु तदवसरेऽग्निसम्पर्कजं दाहदुःखं नैव चिन्तयति, तथैव स्त्रीणां दर्शनेन मनुष्यो घोरसंसारदुःखं नैव विचारयति ।स्वदेहेऽत्यभिमानिनः कामासक्तस्य मूढस्य “अहं” “ममेति” विचारेणकालः गच्छति, तस्यैहिकं पारलौकिकञ्चसर्वं नश्यति । अतः विषयासक्तस्य मनुष्यस्य उद्धरणार्थं भगवद्भक्तिरेव परमगतिर्भवति ।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः—**

1. धर्मस्यावधारणां स्पष्टयत।

2. जीवस्य कामासक्तिविषये लिखत ।

3. जगत्प्रपञ्चं प्रपञ्चयत ।

**विश्लेषणात्मकप्रश्नाः-**

1. जीवस्य संसारगतिमुद्दिश्य लिखत ।

2. जीवस्य विषयासक्तिविषये लिखत।

**निबन्धात्मकप्रश्नाः—**

1. जीवधर्मत्वेन भगवद्भक्तिमालोचयत।

2. संसारसागरतरणोपायत्वेन भगवद्भक्तिं प्रतिपादयत।

**एकाङ्कप्रश्नाः—**

1. मायायाः शक्तिः कतिविधा।

2. मायायाः आवरणशक्तितः किं भवति।

3.मायायाः विक्षेपशक्तितः किं भवति।

4. स्त्रीणां मोहनशक्तितः कः वशीभूतो भवति।

5. संसारसागरात् उद्धरणार्थं उपायः किम्।

6. जीवधर्मत्वेन किं स्वीक्रियते।

7. भगवान् कथं तुष्यति।

8. सर्वतोभावेन भगवतः प्रियः कः।

9. भगवद्गीतायाः कतमः अध्यायः भक्तियोगो भवति।

10. भगवति मनः धारयितुं किं कुर्यात्।

**उत्तराणि —**

1. द्विविधा 2. स्वरूपविस्मृतिः 3.अन्यथा ज्ञानम् 4. पुरुषः 5. भगवद्भक्तिः 6. भगवद्भक्तिः 7.भक्तिभावतः 8.भगवद्भक्तः 9.द्वादशाध्यायः 10.भगवति भक्तिं कुर्यात् ।

# तृतीयांशः

## प्रस्थावना-

भगवतो गुणगानं यस्य वाणी करोति तस्य वाणी एव सार्थका । तथैव भगवत: कार्ये नियुक्तो हस्त एव प्रकृतहस्त: । यो जनो मनसा हरे: स्मरणं करोति, यस्य च चक्षुस्तद्दर्शनोत्सुकं, कर्णौ तत्कथासक्तौ घ्राणञ्च निर्माल्यगन्धहृत् वर्तते, तस्य जन्म सार्थकमेव । यच्छरीरेण विष्णो: पादोदकं सेव्यते तच्छरीरं पवित्रमेव । यन्मस्तकं विष्णोश्चरणे न नमति तन्मस्तकं केवलं भारायैव भवति । यस्य जनस्य जिह्वा हरे: गुणगानं न करोति, तस्य सा जिह्वा दर्दुरजिह्वैवास्ति । तथैव भगवत्कथाविमुखौ कर्णौ कुण्डलभूषितावपि भित्तिरन्ध्राविव भवत: । तथैव हरे: दर्शनविमुखे नयने केकिपिच्छसदृशे एव । यस्य चरणौ भगवन्मन्दिरं न गच्छतस्तस्य तौ चरणौ काष्ठसदृशौ, अर्थात् अचलावेव । ततैव काञ्चनादिभि: भूषितहस्तौ यदि श्रीकृष्णस्य वन्दनं न कुरुतस्तर्हि तौ काञ्चनमिव स्तविरावेव । अतो यो जन: पृथिव्यां जन्म प्राप्य निजेन्द्रियाणि हरयेऽर्पयति स एव विष्णो: यथार्थभक्त: । ये च दुष्टबुद्धिजना: विषयेष्वासक्ता: सन्त: भगवन्तं विस्मरन्ति तेषां जन्मानि निष्फलान्येवेति । एवम्प्रकारेण पुराणेषु भक्ते: माहात्म्यंप्रतिपादितमस्ति ।प्रस्तुतपाठ्यक्रमे एतादृशस्य नारदभक्तिसूत्रस्यतृतीयांशेमुख्यतया जीवस्य कृते भगवद्भक्तेरावश्यकता,भगवद्भक्तेः माहात्म्यं,जीवस्य कृते विशिष्टार्थेन भगवद्भक्तिः इति विषयाः अत्र सम्यक् आलोचिताः सन्ति।

**उद्देश्यम् --**

**प्रियपाठकाःनारदभक्तिसूत्रस्यप्रस्तुतपाठेवयंनिम्नलिखितान्बिन्दून्आलोचयिष्याम:।**

**1. जीवस्य कृते भगवद्भक्तेरावश्यकता**

**2. भगवद्भक्तेः माहात्म्यम्**

**3. जीवस्य कृते विशिष्टार्थेन भगवद्भक्तिः**

## जीवस्य कृते भगवद्भक्तेरावश्यकता

सांसारिकवस्तूनि विषया इति कथ्यन्ते । तेषु विषयेष्वासक्तिरेव संसारगते: स्वरूपंभवति ।मायया अज्ञानग्रस्तः भगवच्चेतनातः विच्छिन्नः जीवः संसारबन्धनात् मुक्त्यर्थं पुनरपि तदेव भगवद्पदं

परमानन्दञ्च प्राप्तुं भगवद्भक्तिमार्गमेव अनुसृत्य चलति।भगवतो गुणगानं यस्य वाणी करोति तस्य वाणी एव सार्थका । तथैव भगवतः कार्ये नियुक्तो हस्त एव प्रकृतहस्तः । यो जनो मनसा हरेः स्मरणं करोति, यस्य च चक्षुस्तद्दर्शनोत्सुकं, कर्णौ तत्कथासक्तौ घ्राणञ्च निर्माल्यगन्धहृत् वर्तते, तस्य जन्म सार्थकमेव । यच्छरीरेण विष्णोः पादोदकं सेव्यते तच्छरीरं पवित्रमेव । यन्मस्तकं विष्णोश्चरणे न नमति तन्मस्तकं केवलं भारायैव भवति । यस्य जनस्य जिह्वा हरेः गुणगानं न करोति, तस्य सा जिह्वा दर्दुरजिह्वैवास्ति । तथैव भगवत्कथाविमुखौ कर्णौ कुण्डलभूषितावपि भित्तिरन्ध्राविव भवतः । तथैव हरेः दर्शनविमुखे नयने केकिपिच्छसदृशे एव । यस्य चरणौ भगवन्मन्दिरं न गच्छतस्तस्य तौ चरणौ काष्ठसदृशौ, अर्थात् अचलावेव । ततैव काञ्चनादिभिः भूषितहस्तौ यदि श्रीकृष्णस्य वन्दनं न कुरुतस्तर्हि तौ काञ्चनमिव स्तविरावेव । अतो यो जनः पृथिव्यां जन्म प्राप्य निजेन्द्रियाणि हरयेऽर्पयति स एव विष्णोः यथार्थभक्तः । ये च दुष्टबुद्धिजनाः विषयेष्वासक्ताः सन्तः भगवन्तं विस्मरन्ति तेषां जन्मानि निष्फलान्येवेति । अतः इह संसारे संसारबन्धनात् विमुच्य धर्मार्थकाममोक्षदिप्राप्तधिया अन्ततः भगवत्प्राप्त्यर्थे भगवत्भक्तेरावश्यकता वरीवर्तते इति निश्चप्रचम् ।

**बोधप्रश्नः**

दुष्टबुद्धिजनाः कुत्र आसक्ताः भवन्ति ।

**भगवद्भक्तेः माहात्म्यम्**

अखिलेऽस्मिन् संसारे जन्तुः स्वर्गनरकादौ चतुरशीतिलक्षयोनिषु भ्रमन् कुत्राऽपि शान्तिं न प्राप्नोति । स्वरूपं विस्मृत्य तेषु जन्मसु सांसारिकविषयेष्वासक्तः जन्तु इतस्ततः भ्रमित्वा यदि भाग्यवशात् भगवत्कृपां प्राप्नोति तर्हि स्वरूपं स्मृत्वा भगवन्तं प्राप्तुं यतते । एवं भूतं मानवशरीरं प्राप्याऽपि योऽहर्निशं भगवच्चरणचिन्तनपरायणः सन् संसारसागरादात्मानमुद्धर्त्तुं न प्रयतते, तस्य जीवनमसफलमेव । तस्य महती दुर्गतिश्च भवति । श्रीमद्भागवते स आत्महा प्रोक्तः। तद्यथा-

**नृदेहमाद्यं सुलभं सुदुर्लभं**
**प्लवं सुकल्पं गुरुकर्णधारम् ।**
**मयानुकूलेन नभस्वतेरितं**
**पुमान् भवाब्धिं न तरेत् स आत्महा ।।** इति ।

भगवत्प्राप्ते: साधनानि शास्त्रेषु ज्ञानकर्मयोगभक्तिरूपेण चतुर्विधानि निर्दिष्टानि सन्ति । किन्तु तेषु भक्तिरेव सुलभा सरला च वर्तते । यतो हि स्वयं भगवान् स्वभक्त्या एव प्राप्तुं शक्यते । स्वयं परमात्मा सच्चिदानन्दरूप: भवति । तं लब्ध्वा जन्तु: परमानन्दपरिपूर्ण: जायते । अयमेव परमात्मा स्वरूपत: भक्त्या एव लभ्यते, न तु ज्ञानकर्मादिभि: । तथा हि कथ्यते-

**न तपोभि र्न वेदैश्च न ज्ञानेनाऽपि कर्मणा ।**
**हरि र्हि साध्यते भक्त्या प्रमाणं तत्र गोपिका: ।।** इति ।

भक्त्या भगवत: वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थ: प्राप्तुं शक्यते। गीतायां श्रीकृष्ण एतदेव उपदिशति यत्-

**भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वत: ।**
**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।।** इति ।

अत्र परमपुरुषार्थ: भक्तियोग इति पुराणानां मतम् । अतएव जीवन्मुक्तानां ज्ञानिनामपि भगवद्भक्ति: परमानन्दप्राप्तये अनिवार्येति श्रीमद्भागवतं प्रतिपादयति । यथा-

**आत्मारामाश्च मनुयो निर्ग्रन्था अप्युरुक्रमे ।**
**कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरि: ।।**

भक्तिरेव सर्वेषां जीवानां सर्वश्रेष्ठ: कल्याणकारिमार्ग: वर्तते । अनया भक्त्या भक्त: साक्षात् भगवन्तं प्राप्य परमानन्दपरिपूर्ण: भवति । भगवद्भक्त्या भक्त: पुलकितांगो द्रवीभूतहृदयश्च भूत्वा आनन्दाश्रु यदा त्यजति तदा आन्तरिकीं पवित्रतामासाद्य यादृशमानन्दं प्राप्नोति, न तादृशं केनाऽप्युपायेन प्राप्तुं जन: शक्नुयात्।

पुराणानां मते भक्ति: परमपदप्राप्तये सर्वश्रेष्ठसाधनमस्ति । स्वयं भगवान् यत्र सेव्यरूपेण सेव्यते, तत्र न किमपि अप्राप्यं स्यात् । अत: भक्तिद्वारा भक्त: यत् किमपि इच्छति तत् सर्वमेव प्राप्नोति स्वर्गादिकं सर्वमेव भोग्यं वस्तु भक्त्याप्राप्तुं शक्यते । सर्वेषां कृते भक्तिरेव उपयोगिनी भवतीति भागवतं कथयति यत्-

**अकाम: सर्वकामो वा मोक्षकाम उदारधी: ।**
**तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ।।**

भक्तौ सर्वे अधिकारिण: भवन्ति । तत्र उच्चवंशे जन्मादीनां प्राधान्यं नास्ति । जीवमात्रस्य अधिकार: भक्तौ वर्तते । भगवान् केवलया भक्त्या परितुष्यते न तु विद्याधनादिभि: । अतो वास्तवत: हरिभक्तिरसामृतसिन्धौ कथितं यत्-

**व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का ।**
**का जाति र्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् ।।**
**कुब्जाया: किमु नाम रूपमधिकं किं तत् सुदाम्नो धनम् ।**
**भक्त्या तुष्यति केवलं न च गुणै र्भक्तिप्रियो माधव:।।** इति ।

प्रगाढ्या भक्त्या प्रसन्नो भगवान् आत्मन: सर्वं कार्यं परित्यज्य भक्तस्य कृते सर्वं कर्तुं सज्जी भवति । पाण्डवानां भक्त्या सन्तुष्टो भगवान् श्रीकृष्ण: उत्कृष्टं कौरवकुलं दूरे परित्यज्य पाण्डवानां मंगलचिन्तां कुर्वन् अर्जुनस्य रथे सारथ्यमपि चकार । प्रह्लादस्य भक्त्याऽऽकृष्ट: भगवान् सर्वासु विपत्सु भक्तं सुरक्षितवान् । ध्रुवस्य भक्त्या वशीभूत: भगवान् अरण्येऽपि तद्रक्षां कृत्वा, अन्ते तस्मै परमलोकं दत्तवान् । कौरवसमामध्ये विवस्त्रायै द्रौपद्यै अक्षयं वस्त्रं दत्वा तल्लजां निवारितवान्। अनेन प्रकारेण स्वभक्तानामुद्धारं भगवान् युगे युगे कुर्वन् वर्तते । भगवान् भक्त्या बद्ध: सन् भक्तानां हृदि स्थित्वा तेषाममंगलं नाशयति, मंगलञ्च वर्धयति । अतो भक्तिरेव सर्वै काम्या, करणीया च वर्तते ।

**बोधप्रश्नः**

अर्जुनस्य रथे सारथ्यं कः चकार ।

## जीवस्य कृते विशिष्टार्थेन भगवद्भक्तिः

श्रीकृष्णभक्तानां महत्त्वमेवं प्रतिपादितं यद् दूरात् कृष्णभक्तं वीक्ष्याऽऽधयो व्याधयो भूतप्रेतपिशाचश्च पलायन्ते । नद्यो नदा:, पर्वतसमुद्राश्च तेभ्य: मार्गं प्रयच्छन्ति। ज्ञाननिष्ठानां विरक्तानां महात्मनां तद्भक्तानां दर्शनं पुण्यवर्जितै: सर्वदा दुर्लभम् ।। तथा च -

**यस्मिन् कुले कृष्णभक्तो जायते कृष्णलक्षणम् ।**
**तत्कुलं विमलं विद्धिमलिमसमपिस्वत: ।।** इति ।

साधुसंबन्धिनश्चान्ये भृत्यदासा: सुहृज्जना: शत्रवो भारवाहाश्च तथा तद्गृहे स्थिता: पक्षिण: पिपीलिका: मशकाद्या: कीटपतंगाश्च पावना भवन्ति । तेऽपि म्लेच्छान् असंस्कृतान् च पावयन्ति ।

हरिभक्ते: माहात्म्यं संहितायां सम्यक् प्रतिपादितम् । तत्र संहितायां सम्यक् प्रतिपादितम् । तत्र वर्णितं यत् हरिभक्ति: अतीव सुखदायिनी जन: केनापि उपायेन यदि हरौ मन: लग्नं करोति तदा स भृंगीव तद्रुपतां याति पुनश्च-

**स्नेहं कामं भगं क्रोधमैक्यं सौहृदमेव च ।**

**कृत्वा तन्मयतां याति सांख्ययोगं विना जनाः ।।** इति ।

**स्नेहान्नन्दयशोदाद्यावसुदेवादयो परे ।**

**कामाद् गोप्यो हरिं प्राप्ता न तु ब्रह्मतया नृप ।।**

**तद्रुपगुणमाधुर्यभावसंलग्नमानसाः ।**

**भयात्कंसस्तव सुतस्तत्सायुज्यं जगामहे ।।**

**क्रोधादयं दन्तवक्त्रः शिशुपालदयोऽपरे ।**

**ऐक्याच्चायादवा यूयं सौहृदाच्चवयं तथा ।।** इति ।

भक्तः भक्तिं विना वस्तुतो न किमपीच्छति । तद्यथा श्रीमद्भागवते एकादशस्कन्धे भगवदुक्तौ-

**न कश्चित् साधवो धीराः भक्ता हैकान्तिनो मम ।**

**वाञ्छन्त्यपि मया दत्तं कैवल्यम् न पुनर्भवम् ।।** इति ।

पद्मपुराणे कार्त्तिकमाहात्म्ये उक्तम्-

**वरं देव मोक्षं न मोक्षावधिं वा ।**

**न चान्यं वृणेऽहं वरेशादपीह ।।**

**इदं ते वपुर्नाथ गोपालबालं ।**

**सदा मे मनस्याविरास्तां किमन्यैः ।।**

**तथा प्रेमभाक्तिं स्वकां मे प्रयच्छ ।**

**न मोक्षाऽऽग्रहो मेऽस्ति दामोदरेह ।।** इति ।

भक्तिं प्राप्य भक्तो मोक्षमपि न काङ्क्षते । सैव भक्तिः सर्वपापविनाशकारिणी क्लेशहन्त्री शुभदायिनी मोक्षादपि गरीयसी भवति । तद्यथा भक्तिरसामृतसिन्धौ-

**क्लेशघ्नी शुभदा मोक्षलघुताकृता सुदर्लभा ।**

**सान्द्रानन्दविशेषात्मा श्रीकृष्णाऽऽकर्षणी च सा ।।** इति ।

क्लेशस्तु पापं तद्बीजमविद्या चेति त्रिधा । तत्राऽपि पापं प्रारब्धाऽप्रारब्धभेदेन द्विविधं भवति । अस्याः भक्तेरप्रारब्धहरत्वमपि प्रदर्शितं भागवते एकादशस्कन्धे । अग्निः यथा काष्ठादीनि भस्मी करोति तथैव भगवद्विषया भक्तिरपि सर्वाण्यप्रारब्धकर्माणि विनाशयति । उक्तं यथा-

**यथाग्निः सुसमिद्धार्चः करोत्येधांसि भस्मसात् ।**

**तथा मद्विषया भक्तिरुधवैनासिं कृत्स्नशः ।।** इति ।

भगवद्भक्तिरेषा यथा अप्रारब्धकर्माणि विनाशयति तथैव प्रारब्धकर्माण्यपि सर्वात्मना भस्मी करोतीत्यस्याः वैशिष्ट्यम् । यथा तृतीयस्कन्धे भागवते उक्तम् -

**यन्नामदेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणाद् क्वचित् ।**

**श्वानोऽपि सद्यः सबनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात्।।**

तत्राऽपि प्रारब्धं बीजं वासनामयं प्रारब्धत्वोन्मुखमिति अप्रारब्धफलमपि विष्णुभक्त्या क्रमेणैव नाशं प्रयाति । भगवतः पादपंकजयोः सततभजनात् सर्वाण्यपि कर्माणि चूर्णी भवन्ति । अर्थात् जन्ममृत्युभयं तद्भक्तानां न भवतीति भावः परिस्फुटी भवति । एनामपि भक्तिं समधिगम्य यदि कोऽपि वैषयिकं सुखमिच्छति तर्हि प्राप्नोति । यदिकोऽपि ब्राह्मसुखं प्राप्तुमिच्छति तदप्यधिगच्छति । ऐश्वरं सुखमिष्यमाणोऽपि जनः तथाविधं सुखं लभतेति सुखदा लतेयं भक्तिः । एवंविधां भगवद्भक्तिमधिगच्छन् सर्वानपि पुरुषार्थान् तृणेभ्यः मन्यते । अल्पमपि प्ररुढाया न तु जनितायास्तस्याः स्वयं प्रकाशरूपत्वात् धर्मार्थकाममोक्षाख्याः पुरुषार्थाः तत्र गन्तुं लज्जन्ते । संसारसागरतारिणी एषा भक्तिः सर्वेभ्यो भक्तेभ्यः आनन्दं प्रदाय विजयतेतराम् । एषा भक्ति र्न ज्ञानरूपा, ज्ञानादपि सुदर्लभा । ज्ञानं लभमानाय जनाय कदाचित् हरिः मुक्तिं प्रयच्छति न तु भक्तिम् । यथोक्तम् -

**अस्येवमंग भजतां भगवान् मुकुन्दो ।**

**मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम् ।।** इति ।

कर्हिचित् ददाति इत्युक्तम् । "आशाकल्येच्च चिच्चन्नौ" । अतएव कर्हिचिदपि नोक्तम् । तस्यात् आसंगेनापि कृते साधनभूते साक्षाद् भक्तियोगे सति यावत् फलभूते भक्तियोगे गाढासक्ति र्न जायते, तावत् न ददातीत्यर्थः । अतः अन्याभिलषिताशून्यमुत्तमभक्तेः लक्षणमिति तदुत्कृष्टत्वं पूर्वं प्रतिपादितम् । अतः भक्तः वाञ्छति त्वयि मे रतिरनपायिनी भवतु । निरन्तरं भक्तिः प्रवहतामिति । अतः निश्चीयते परमानन्दप्राप्तये सर्वेभ्यः प्राप्त्युपायेभ्यः भक्तिः सर्वातिशायिनीति।

**बोधप्रश्नः**

जीवः मोक्षमपि न कांक्षते किं प्राप्य ।

# सारांशः

भगवत्प्राप्तेः साधनानि शास्त्रेषु ज्ञानकर्मयोगभक्तिरूपेण चतुर्विधानि निर्दिष्टानि सन्ति । किन्तु तेषु भक्तिरेव सुलभा सरला च वर्तते । यतो हि स्वयं भगवान् स्वभक्त्या एव प्राप्तुं शक्यते । स्वयं परमात्मा सच्चिदानन्दरूपः भवति । तं लब्ध्वा जन्तुः परमानन्दपरिपूर्णः जायते । अयमेव परमात्मा स्वरूपतः भक्त्या एव लभ्यते, न तु ज्ञानकर्मादिभिः । भगवान् भक्त्या बद्धः सन् भक्तानां हृदि स्थित्वा तेषाममंगलं नाशयति, मंगलञ्च वर्धयति । अतः भक्तः वाञ्छति भगवति मे रतिरनपायिनी भवतु । निरन्तरं भक्तिः प्रवहतामिति । अतः निश्चीयते परमानन्दप्राप्तये सर्वेभ्यः प्राप्त्युपायेभ्यः

भक्तिः सर्वातिशायिनीति,भक्तिरेव सर्वै काम्या, करणीया च वर्तते इति।प्रस्तुतपाठ्यक्रमे एतादृशस्य नारदभक्तिसूत्रस्यतृतीयांशेमुख्यतया जीवस्य कृते भगवद्भक्तेरावश्यकता,भगवद्भक्तेः माहात्म्यं,जीवस्य कृते विशिष्टार्थेन भगवद्भक्तिः इति विषयाः अत्र सम्यक् आलोचिताः सन्ति।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः—**

1. भगवद्भक्तेरावश्यकतां लिखत।

2. भगवद्भक्तेरुपादेयतामाविष्कुरुत।

3. भक्तिमाहात्म्यमुद्दिश्य श्लोकद्वयं लिखत ।

**विश्लेषणात्मकप्रश्नाः—**

1.भगवद्भक्तस्य विषये लिखत।

2. भक्तिमाहात्म्यं प्रकटयत।

**निबन्धात्मकप्रश्नाः—**

1. भक्तिवैशिष्ट्यमाविष्कुरुत ।

2. मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसीति आलोचयत।

**एकाङ्कप्रश्नाः—**

1. शङ्कराचार्यस्य मते भक्तिः किम्।

2. अर्जुनस्य सारथ्यं कः चकार।

3. भगवद्गीतायां भक्तियोगः कस्मिन् अध्याये अस्ति।

4. भगवद्गीतानुसारं भक्तः कतिविधः।

5. किं प्राप्य भक्तः मोक्षमपि न इच्छति।

6. मोक्षसाधनसामग्र्यां किं गरीयसी भवति ।

7. भगवद्प्राप्तये कः मार्गः सरलः सुलभश्च भवति ।

8. केन तीव्रयोगेन यजेत पुरुषं परम् ।

9. भक्त्या तुष्यति कः।

10. कः आत्महा भवति।

**उत्तराणि —**

1.स्वस्वरूपानुसन्धानं भक्तिः 2. श्रीकृष्णः 3.द्वादशाध्याये 4. चतुर्विधः 5. भगवद्भक्तिं प्राप्य 6. भक्तिः

7.भक्तिमार्गः 8. भक्तियोगेन 9. माधवः 10. मनुष्यजन्म प्राप्यापि यो भगवद्भक्तिं न करोति।

# चतुर्थांशः

## प्रस्थावना-

भक्तिप्रस्थाने अन्यतमः प्रसिद्धः ग्रन्थःशाण्डिल्यभक्तिसूत्रम् । अयमपिग्रन्थःसूत्ररूपेण रचितोभक्तिलक्षणग्रन्थः। शाण्डिल्यभक्तिसूत्राणि विशेषतयातत्त्वविषयान्निर्दिशन्ति।ग्रन्थेऽस्मिन्अध्यायत्रयं वर्तते। त्रिषु अध्यायेष्वपि प्रथमाह्निकं, द्वितीयाह्निकमितिभागद्वयमास्ते। ईश्वरपरानुरक्तिरेव भक्तिरिति शाण्डिल्यमुनिमतम् । ग्रन्थेस्मिन् विशेषतयाभक्तेःनिर्वचनं, स्वरूपं, भेदाःप्रभेदाश्चनिरूपिताः सन्ति । गम्भीरशैल्या भगवतः तत्त्वमत्र

निरूपितमस्ति ।प्रस्तुतपाठ्यक्रमे अत्र चतुर्थांशे शाण्डिल्यभक्तिसूत्रपुरःसरं भक्तितत्त्वं,भक्तिविषयकाः भेदाः प्रभेदाः,नवधा भक्तिश्च चर्चिताः सन्ति ।

## उद्देश्यम् --

प्रियपाठकाःनारदभक्तिसूत्रस्यप्रस्तुतपाठेवयंनिम्नलिखितान्विन्दून्आलोचयिष्यामः।

1. **शाण्डिल्यभक्तिसूत्रपुरःसरं भक्तितत्त्वम्**

2. **भक्तिविषयकाः भेदाः प्रभेदाः**

3. **नवधा भक्तिः**

**शाण्डिल्यभक्तिसूत्रपुरःसरं भक्तितत्त्वम्**

भक्तिप्रस्थाने अन्यतमः प्रसिद्धः ग्रन्थःशाण्डिल्यभक्तिसूत्रम् । अयमपिग्रन्थःसूत्ररूपेण रचितोभक्तिलक्षणग्रन्थः। शाण्डिल्यभक्तिसूत्राणि विशेषतयातत्त्वविषयान्निर्दिशन्ति।ग्रन्थेऽस्मिन्अध्यायत्रयं वर्तते। त्रिषु अध्यायेष्वपि प्रथमाह्निकं, द्वितीयाह्निकमितिभागद्वयमास्ते। ईश्वरपरानुरक्तिरेव भक्तिरिति शाण्डिल्यमुनिमतम् । ग्रन्थेस्मिन् विशेषतयाभक्तेःनिर्वचनं, स्वरूपं, भेदाःप्रभेदाश्चनिरूपिताः सन्ति । गम्भीरशैल्या भगवतः तत्त्वमत्र निरूपितमस्ति । व्याकरणशास्त्रानुगुण्येन भक्तिशब्दः भज् सेवायाम् इति धातोः निष्पन्नत्वात्प्रीतिपूर्वकतया भगवत्सेवाएव भक्तिरिति निष्पन्नार्थो भवति। भजनं(रसनम्)भक्तिः,भागो भक्तिःअथचभजनं भक्ति इति व्युत्पत्तिदृष्ट्याप्रदत्तानि इतराणि निम्नोक्तनिर्वचनानि एतासां व्युत्पत्तीनां निहितार्थमेव सूचयन्ति यथा-भगवदानन्दचर्वणमेव भक्तिः । अस्मासु भगवदधीनत्वबुद्धिरेव भक्तिः। अस्माकं रागद्वेषादेःअविद्यायाश्चविनाशकशक्तिरेव भक्तिः इति ।

भक्तिस्वरूपनिरूपकशास्त्राणि भक्तिशब्दस्य निर्वचनविवरणादिकं बहुधा कुर्वन्ति।

तादृश्यः काश्चनसूक्ती: उद्धरामः । यथा -

शाण्डिल्यभक्तिसूत्रानुसारम् -सा परानुरक्तिरीश्वरे

नारदभक्तिसूत्रानुसारम्- सा त्वस्मिन् परमप्रेमरूपा

या प्रीतिरविवेकानांविषयेष्वनपायिनी।

त्वामनुस्मरतः सा मे हृदयात् मापसर्पतु ।।

विष्णुपुराणम् 1.10.17

विस्मृत्य जगत्, विस्मृत्य स्वदेहं, विस्मृत्य च स्वात्यन्तप्रियतमं वस्तु भगवत्प्रीणनमेव भगगत्प्रेमेत्युच्यते। भगवत्प्रेम हिरज्जुरिव भवति। भगवत्प्रेमोत्पत्तौ सत्यां भगवान्भक्तेन बद्धो भवति। तस्मात्पलायितुं न शक्नोति। भक्तिद्वारा एव केवलं तस्यदर्शनं शक्यंभवति। सा भक्तिःपक्वा, प्रेमरूपा, अनुरागविशिष्टाच स्यात् । जनन्यामिव शिशो: सत्या इव पतौ सा भक्ति: उत्कटा स्यात्।एवम्प्रकारेण भक्तिःलौकिकी नास्ति । सा परानुरक्तिरीश्वरे'अथवा 'सा त्वस्मिन्परमप्रेमरूपा'इति भक्तिसूत्रग्रन्थधिया निगदितमस्ति ।

**बोधप्रश्नः-**

**भक्तिविषये 'सा परानुरक्तिरीश्वरे' इति कस्याभिमतम् ।**

**भक्तिविषयकाः भेदाः प्रभेदाः**

भक्तिशास्त्रेषु भक्तिः परापराभेदेन विभक्ता। अनयोःद्वितीया गौणीभक्तिरित्यभिधीयते। भगवत्साक्षात्कारानन्तरं तत्फलत्वेन उत्पद्यमाना सहजा भक्तिरेव पराभक्तिः। साधनावस्थावस्थिता

भक्तिः अपराभक्तिः अथवा गौणीभक्तिरित्युच्यते।दैवभक्तिः भगवति परमप्रेमरूपा इति प्रायः सर्वेजानन्ति।लौकिके प्रेम्णि विषयवासनायाःप्रतिफलापेक्षायाः, ईर्षासूयादीनाञ्च अवकाशो वर्तते।ननु शिशुपाल-पौण्ड्रक-साल्वप्रभृतयः परमात्मानं श्रीकृष्णं प्रद्विषन्तः तेनैव चोपहताः तमेव सम्प्राप्ताःअभवन्। एवञ्चभगवद्वेषिणामपि तावद्वेषजन्य- एकाग्र्येण परमात्मसंप्राप्तिर्भवतीति चेत्तं प्रीणानाः तमेव प्राप्नुयुरित्यत्र कस्सन्देहः ।अस्माकम् अन्तर्यामिनि परमात्मनि विधीयमान परमप्रेमेवभक्तिः। लोकिकप्रेम्णिउच्चावाच्चवर्तते। अभीष्टे वस्तुनि लब्धेऽपि तत्र अनल्पबुद्ध्या अतृप्तिर्जायते।पराभक्ति: लक्ष्यञ्चेत्अपराभक्तिः लक्ष्यसाधनं भवति। ईश्वरसाक्षात्कारानन्तरमभिव्यक्तः परमानन्दएव पराभक्तिरिति शास्त्रमतमस्ति ।भगवति परमप्रेमरूपा अपराभक्तेः सोपनद्वयं वर्तते । तत्रैकंसोपानं गौणभक्तिःअन्यत्मुख्यभक्तिरथवा प्रेमभक्तिरितिज्ञायते । गौणभक्तिः पुनःसात्त्विक - राजसिक- तामसिकभेदेन त्रिधा वर्तते। अस्माकं हृदयान्तराले सहजतया विद्यमानायाःप्रीतेःभगवति दिशि प्रसारणमेव गौणभक्तिरित्युच्यते । भगवत्कथामाहात्म्येआसक्तिः,निरन्तरंभगवतः पूजाकार्यक्रमेषु आसक्तिः,सदा तस्यस्मरणं, तस्य दास इति भावना, मित्रमिति भावना, मातृरूपेण पितृरूपेण भगवति सम्बन्धकल्पनमपिभक्तेः प्रकारभेदताः भवन्ति । एकादशभेदाः गौणभक्तेः निरूपिताःसन्ति । गौणभक्तिःक्रमशःअभ्यासेन मुख्यभक्तिंप्रतिप्रेरकः भवति।शाण्डिल्यभक्तिसूत्रग्रन्थस्य आधारेण भक्ते: भेदविषयेउच्यते यत् -

गौणंत्रैविध्यमितरेण स्तुत्यर्थत्वात्साहचर्यमिति ।

श्रीमद्भगवद्गीतायाः वचनानुसारं भक्तिः चतुर्विधा भवति । तद्यथा-

1.आर्तभक्तिः –विपदः उद्धरणार्थं स्तुस्तिप्रार्थनधिया भगवति शरणागतिरूपा भक्तिरेव आर्तभक्तिरित्युच्यते ।

२. जिज्ञासाभक्तिः -

स्ववर्णाश्रमविहितकर्माणि, गुरुशुश्रूषां, भगवत्तत्त्वञ्च ज्ञातुम् आचर्यमाणा भक्तिर्भवति जिज्ञासाभक्तिः ।

3. अर्थार्थित्वभक्तिः -

परभक्तिमभिलषित्वा, राज्यस्वर्गादिसुखानि वा प्राप्तुमनुष्ठीयमानाभक्तिःअर्थार्थित्वभक्तिरिति निगद्यते ।

4.ज्ञानभक्तिः

श्रवण-कीर्तन- स्मरण- पादसेवन-अर्चन-वन्दन-दास्य-सख्य-आत्मनिवेदनरूपभक्त्याङ्गानि अनुसरन्भगवानेव आत्मा इति मत्वासहजतया अनुष्ठीयमाना भक्तिर्भवति ज्ञानभक्तिः।इयमेवज्ञानभक्तिःमुख्यभक्तिरिति नाम्ना प्रसिद्धास्ति ।

**नवधा भक्तिः**

भगवतः पूजनपद्धतौ प्रायशःनवविधभक्तय: भवन्तीतिउच्यते । श्रीमद्रामायणे श्रीरामः लक्ष्मणं प्रति नवविधभक्तिमार्गान्प्रदर्शितवानिति दृश्यते । तथैव प्रह्लाद : हिरण्यकशिपुं प्रति नवविधभक्तिमार्गान्अकथयत।तदेव नवविधभक्तिमार्गः लोके अत्यन्तं प्रसिद्धः वर्तते। यथा

श्रवणं कीर्तनं विष्णोः स्मरणंपादसेवनम्।

अर्चनं वन्दनं दास्यंसख्यमात्मनिवेदनम् ।।

श्रीमद्भागवतम्7.5,23

भगवतः सान्निध्ये निरन्तरं भवितुंएकैकस्य एकैको मार्गोवर्तते। तेषु प्रधानतया एते नवविधभक्तिमार्गाः एव सर्वथाउपयुक्ताः भवन्ति । कीर्तनादयः भक्तिभेदाः भक्तेः बाह्याङ्गानि अपि सन्ति । तथैव रुचिप्राधान्यमनुसृत्य ताः भक्तेः आन्तरिकाङ्गानि अर्थात् मुख्याङ्गानि अपि भवन्ति । ते एव भक्तिभेदाः लोके नवविधभक्तयः इति प्रसिद्धिं गताः । तेषां विषयेत्र यथाग्रन्थं संक्षिप्ततः आलोचयामः ।

1. **श्रवणम्-**

भगवतः कथागुणनामादीनांश्रवणमाध्यमेनज्ञानंवर्धयन्त: भगवतः सामीप्यप्राप्तौ प्रयत्नशीलताएव श्रवणभक्तिरिति उच्यते ।परीक्षित्महाराज: एव श्रवणभक्तेःउत्तमोदाहरणभूतः इति वक्तुं शक्नुमः।कथाश्रवणमेव योगवदनुष्ठीय मुक्तिमाप्नोति जनः। तदेव महर्षिशुकेन प्रोक्तंपरीक्षिन्महाराजेनचश्रुतं भक्तिप्रधानंश्रीमद्भागवतमिति ।

2. **कीर्तनम्-**

भगवत: लीलागानं कुर्वन्तःगायन्त : नर्तनमपि कुर्वन्त:भगवच्चेतनायांतल्लीनताप्राप्तिरेव कीर्तनभक्तिरित्युच्यते।

3. **स्मरणम्-**भगवतः निरन्तरध्यायनमेव स्मरणभक्तिरित्युच्यते। 'यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्विमुच्यतेजनः' इत्यादिप्रकारेणविष्णुसहस्रनामग्रन्थादिषुवयं पश्यामः।प्रह्लादः स्मरणभक्तेः प्रसिद्धोदाहरणभूतोभवति । तथा ध्रुवः अपि स्मरणरूपभक्तेःमार्गदर्शकः भवति।

4.**पादसेवनम्-** :

निरन्तरंमनसि भगवतः पादपद्मयोःआराधनमेव पादसेवनमित्युच्यते। यतो हि वयं लक्ष्मीः, गरुडः इववानिरन्तरंभगवतः पादसेवनं कर्तुं न शक्नुमः। अत: भक्त्या भगवतः पदारविन्दौ नित्यंहृदये संस्थाप्य तद्धिया भगवतः आराधनंपादसेवनभक्तिरित्युच्यते।उपर्युक्तरीत्या लक्ष्मीः गरुडश्चपादसेवनभक्तावेति उदाहरणत्वेन वक्तुं शक्यते । लक्ष्मणस्तथा भरतोपि अस्मिन्भक्तिप्रभेदे अन्तर्भवतः।

5. **अर्चनम्-** :

तुलसीदलैः, विभिन्नपुष्पैस्तथाविविधपूजनोपचारैश्च भगवतः पूजनमेव अर्चनभक्तिरिति उच्यते।मथुरानगरस्था कुब्जा अत्रउदाहरणरूपेण वक्तुं शक्यते। साभक्त्या श्रीकृष्णाङ्गेषुसुगन्धिलेपनं कृतवती।तस्याः भक्त्या सन्तुष्टः श्रीकृष्ण: कुरूपिणींतांसुन्दरीतरुणीरूपेणपरिवर्तितवान् ।

6. **वन्दनम्**

भक्तिभावतःश्रद्धयाभगवते क्रियमाणः नमस्कारोवन्दनभक्तिरिति परिगण्यते ।

वन्दनभक्तौप्रसिद्धमार्गदर्शक: अक्रूरःभवति । सः वृन्दावने श्रीकृष्णबलरामौ नमस्कृत्य तयोः अनुग्रहपात्रत्वमाप्नोत्।

7. **दास्यम्-** :सर्वकालसर्वावस्थासु भगवत: सेवांकृत्वातयैव भावनया जीवनयापनंदास्यभक्तित्वेन परिगण्यते।भगवतः श्रीकृष्णस्य चरणसेवायां मनो निधाय रुक्मिणी दास्यभक्तिंप्रदर्शितवती। दास्यभक्तेःप्रधाननिदर्शकोभवति हनुमान् ।

8. **सख्यम्** :

भगवन्तं मित्रत्वेन सम्भाव्य तस्य गुणगणानामनुकरणमेव सख्यभक्तीत्युच्यते।अर्जुनः सख्यभक्तेः उदाहरणत्वेनस्वीक्रियते। काश्चनगोपिका: अपि श्रीकृष्णंमित्रभावनयाप्राप्नुवन्ति स्म।

9.**आत्मनिवेदनम्-**

मनोवाक्कायकर्मभिः भगवते स्वात्मसमर्पणमेव आत्मनिवेदनभक्तिरित्युच्यते।

बलिचक्रवर्तिमहाराजः आत्मनिवेदनभक्तेःप्रधानोदाहरणभूतःएव ।

एवम्प्रकारेण संक्षिप्ततया सोदाहरणं नवविधभक्तिविषये ज्ञातुंशक्यते ।

# सारांशः

भक्तिप्रस्थाने अन्यतमः प्रसिद्धः ग्रन्थःशाण्डिल्यभक्तिसूत्रम् । अयमपिग्रन्थःसूत्ररूपेण रचितोभक्तिलक्षणग्रन्थः। शाण्डिल्यभक्तिसूत्राणि विशेषतयातत्त्वविषयान्निर्दिशन्ति।ग्रन्थेऽस्मिन्अध्यायत्रयं वर्तते। ईश्वरपरानुरक्तिरेव भक्तिरिति शाण्डिल्यमुनिमतम् । प्रस्तुतपाठ्यक्रमे अत्र चतुर्थांशे शाण्डिल्यभक्तिसूत्रपुरःसरं भक्तितत्त्वं,भक्तिविषयकाः भेदाः प्रभेदाः,नवधा भक्तिश्च चर्चिताः सन्ति ।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः—**

1. सोदाहरणं सख्यभक्तिं विवृणुत।

2. आत्मनिवेदनभक्तिं व्याख्यात।

3. श्रवणभक्तेः माहात्म्यं लिखत ।

**विश्लेषणात्मकप्रश्नाः—**

1.सा परानुरक्तिरीश्वरे इति सूत्रं व्याख्यात।

2. तीव्रेण भक्तियोगेनयजेत पुरुषं परमिति विषयमालोचयत।

**निबन्धात्मकप्रश्नाः—**

1. नवधाभक्तिविषये विशदयत ।

2. भक्तिविषयकाः भेदाः प्रभेदाःकथम्प्रकारतया सन्तीति आलोचयत ।

**एकाङ्कप्रश्नाः—**

1. श्रवणभक्तेः उदाहरणत्वेन कः प्रसिद्धः।

2. कीर्तनभक्तेः उदाहरणं लिखत।

3. स्मरणभक्तेः परिचायकः कः।

4. लक्ष्मीः कस्य भक्तेः उदाहरणं भवति।

5. अर्चनभक्तेः उदाहरणं लिखत।

6. उद्धवस्य भक्तिः कीदृशी ।

7. हनुमतः भक्तिः कीदृशी ।

8. अर्जुनस्य भक्तिः कीदृशी ।

9. आत्मनिवेदनभक्तेः परिचायकः कः।

10. भक्तेः भेदद्वयं प्रकटयत।

**उत्तराणि —**

1.परिक्षित् 2.महर्षिनारदः 3.प्रह्लादः 4. पादसेवनम् 5. मथुरानगर्य्याः कुब्जा 6. वन्दनभक्तिः

7.दास्यभक्तिः 8. सख्यभक्तिः 9. महाराजः बलिः 10. गौणी मुख्या च।